उक्तस्तस्याग्नितीये यो वैषिकः सर्व्वशो विधिः।
सोऽतिस्विन्नस्य कर्त्तव्यो मधुरस्निग्धशीतलः ॥”
अग्नितीये श्वयनाध्याये ॥ * ॥
“कषायमद्यनित्यानां गर्भिण्या रक्तपित्तिनाम् ।
पित्तिनां सातिसाराणां रूक्षाणां मधुमेहि-
नाम् ॥
विदग्धभ्रष्टब्रध्नानां विषमद्यविकारिणाम् ।
श्रान्तानां नष्टसंज्ञानां स्थूलानां पित्तमेहि-
नाम् ॥”
श्रान्तानां क्लान्तानाम् ।
“तृष्यतां क्षुत्परीतानां क्रुद्धानां शोचतामपि ।
कामल्युदरिणाञ्चैव क्षतानामाढ्यरोगिणाम् ॥
दुर्ब्बलातिविशुष्काणामुपक्षीणौजसान्तथा ।
भिषक् तैमिरिकाणाञ्च न स्वेदमवतारयेत् ”*॥
प्रतिश्याये च कासे च हिक्काश्वासेष्वलाघवे ।
कर्णमन्याशिरःशूले स्वरभेदे गलग्रहे ॥
अर्द्दितैकाङ्गसर्व्वाङ्गपक्षाघाते विनामके ।
कोष्ठानाहविबन्धेषु मूत्राघाते विजृम्भके ॥
पार्श्वपृष्ठकटीकुक्षिसंग्रहे गृध्रसीषु च ।
मूत्रकृच्छ्रे महत्त्वे च मुष्कयोरङ्गमर्द्दके ॥
पादोरुजानुजङ्घार्त्तिसंग्रहे श्वयथावपि ।
खल्लीष्वामे च शीते च वेपथौ वातकण्टके ॥
सङ्कोचायामशूलेषु स्तम्भगौरवसुप्तिषु ।
सर्व्वेष्वेषु विकारेषु स्वेदनं हितमुच्यते ॥ * ॥
तिलमाषकुलत्थाम्लघृततैलामिषौदनैः ।
पायसैः कृशरैर्म्मांसैः पिण्डस्वेदान् प्रयोजयेत् ॥
गोखराश्ववराहोष्ट्रशकृद्भिः सतुषैर्यवैः ।
सिकतापांशुपाषाणकरीषायसपूटकैः ॥
श्लैष्मिकान् स्वेदयेत् पूर्व्वैर्व्वातिकान् समुपाचरेत्
द्रव्याण्येतानि शस्यन्ते यथास्वं प्रस्तरेष्वपि ॥
भूगृहेषु च जेन्ताकेषूष्णगर्भगृहेषु च ।
विधूमाङ्गारतप्तेष्वभ्यक्तः स्विद्यति ना सुखम् ॥
ग्राम्यानूपौदकं मांसं पयोवस्तशिरस्तथा ।
वराहमध्यपित्तासृक्स्नेहवत्तिलतण्डुलाः ॥
इत्येतानि समुत्क्वाथ्य नाड़ीस्वेदं प्रयोजयेत् ।
देशकालविभागज्ञो युक्त्यपेक्षी भिषक्तमः ॥*॥
वारुणामृतकैरण्डशिग्रुमूलकसर्षपैः ।
वासावंशकरञ्जार्कपत्रैरश्मन्तकस्य च ॥
शोभाञ्जनकशैवीरमालतीसुरसार्जकैः ।
पत्रैरुत्क्वाथ्य सलिलं नाड़ीस्वेदं प्रयोजयेत् ॥
भूतीकपञ्चमूलाभ्यां सुरया दधिमस्तुना ।
मूत्रैरम्लैश्च सस्नेहैर्नाड़ीस्वेदं प्रयोजयेत् ॥ * ॥
एत एव च निर्य्यूहाः प्रयोज्या जलकोष्ठके ।
स्वेदनार्थं घृतक्षीरतैलकोष्ठांश्च कारयेत् ॥
गोधूमशकलैश्चूर्णैर्यवानामम्लसंयुतैः ।
सस्नेहकिण्वलवणैरुपनाहः प्रशस्यते ॥ * ॥
गन्धैः सुरायाः किण्वेन जीवन्त्या शतपुष्पया ।
उमया कुष्ठतैलाभ्यां युक्तया चोपनाहयेत् ॥*॥
चर्म्मभिश्चोपनद्धव्यः सलोमभिरपूतिभिः ।
उष्णवीर्य्यैरलाभे तु कौशेयाविकशाटकैः ॥
रात्रौ बद्धं दिवा मुञ्चेत् मुञ्चेद्रात्रौ दिवाकृतम् ।
विदाहपरिहारार्थं स्यात् प्रकर्षस्तु शीतले ॥

सङ्करः १ प्रस्तरो २ नाड़ी परिषेको४ऽवगाह-
नम् ५ ।
जेन्ताको६ऽश्मघनः ७ कर्षूः ८ कुटी ९ भूः १०
कुम्भिरेव च ११ ॥
कूपो १२ होलाक १३ इत्येते स्वेदयन्ति त्रयो-
दश ।
ते यथावत् प्रवक्ष्यन्ते सर्व्व एवानुपूर्व्वशः ॥”
इति ॥*॥

तत्र वस्त्रान्तरितैरवस्त्रान्तरितैर्व्वा पिण्डैर्यथोक्तैरुपस्वेदनं सङ्करस्वेद इति विद्यात् ॥१॥ शूकशमीधान्यपुलाकानां वेशवारपायसकृशरोत्कारिकादीनां वा प्रस्तरे कौषेयाविकोत्तरप्रच्छदे पञ्चाङ्गुलैरुबुकार्कपत्रप्रच्छदे वा स्वभ्यक्तसर्व्वगात्रस्य शयानस्योपरि स्वेदनं प्रस्तरस्वेद इति विद्यात् ॥ २ ॥ स्वेदनद्रव्याणां पुनर्म्मूलफलपत्रभङ्गादीनां मृगशकुनिपिशितशिरःपदादीनामुष्णस्वभावानां वा यथार्हमम्ललवणस्नेहोपसंहितानां मूत्रक्षीरादीनां वा कुम्भ्यां वाष्पमनुद्वमन्त्यामुत्क्वथितानां नाड्या शरेषीकावंशदलकरञ्जार्कपत्रान्यतमकृतया गजाग्रहस्तसंस्थानया व्यामदीर्घया व्यामार्द्धदीर्घया वा व्यामचतुर्भागाष्टभागमूलाग्रपरिणाहस्रोतसा सर्व्वतो वातहरपत्रसंवृतच्छिद्रया द्विस्त्रिर्व्वा विनामितया वातहरसिद्धस्नेहाभ्यक्तगात्रस्य वाष्पमुपहरेत् । वाष्पो ह्यनृजुगामी विहतचण्डवेगस्त्वचमविदहन् सुखं स्वेदयतीति नाड़ीस्वेदः ॥३॥ वातिकोत्तरवातिकानां पुनर्म्मूलादीनामुत्क्वाथैः सुखोष्णैः कुम्भीर्व्वर्षुकाः प्रनाड़ीर्व्वा पूरयित्वा यथार्हसिद्धस्नेहाभ्यक्तगात्रं वस्त्रावच्छन्नं परिषेचयेदिति परिषेकः ॥ ४ ॥ वातहरोत्क्वाथक्षीरघृततैलपिशितरसोष्णसलिलकोष्ठकावगाहस्तु यथोक्त एवावगाहः ॥ ५॥ अथ जेन्ताकं चिकीर्षुर्भूमिं परीक्षेत । तत्र पूर्व्वस्यां दिश्युत्तरस्यां वा गुणवति प्रशस्ते भूमिभागे कृष्णमृत्तिके सुवर्णवर्णमृत्तिके वा परीवापपुष्करिण्यादीनां जलाशयानामन्यतमस्य कूले दक्षिणे पश्चिमे वा सूपतीर्थे समसुविभक्तभूमिभागे सप्ताष्टौ वा अरत्नीः उपक्रम्योदकात् प्राङ्मुखमुदङ्मुखं वा अभिमुखतीर्थं कूटागारं कारयेत् । उत्सेधविस्तारतः परमरत्नीः षोड़श समन्तात् सुवृत्तं मृत्कर्म्मसम्पन्नमनेकवातायनम् । अस्य कूटागारस्यान्तः समन्ततो भित्तिमरत्निविस्तारोत्सेधां पिण्डिकां कारयेत् आकपाटात् । मध्ये चास्य कूटागारस्य चतुष्किष्कुमात्रं पुरुषप्रमाणं मृन्मयं कन्दूसंस्थानं बहुसूक्ष्मच्छिद्रमङ्गारकोष्ठकस्तम्भं सपिधानं कारयेत् । तञ्च खादिराणामाश्वकर्णादीनां वा काष्ठानां पूरयित्वा प्रदीपयेत् । स यदा जानीयात् साधु दग्धानि काष्ठानि गतधूमानि अवतप्तञ्च केवलमग्निना तदग्निगृहं स्वेदयोग्येन चोष्मणा युक्तमिति तत्रैवं पुरुषं वातहराभ्यक्तगात्रं वस्त्रावच्छन्नं प्रवेशयेत् । प्रवेशयंश्चैनमनुशिष्यात् सौम्य प्रविश कल्याणायारोग्याय चेति । प्रविश्य चैनां पिण्डिकामधिरुह्य पार्श्वापरपार्श्वाभ्यां यथासुखं शयीथाः । न च त्वया स्वेदमूर्च्छापरीतेनापि सता पिण्डिकैषा विमोक्तव्या आप्राणोच्छ्वासात् । भ्रश्यमानो ह्यतः पिण्डिकावकाशात् द्वारमनधिगच्छन् स्वेदमूर्च्छापरीततया सद्यःप्राणान् जह्याः । तस्मात् पिण्डिकामेनां न कथञ्चन मुञ्चेथाः । त्वं यदा जानीयाः विगताभिष्यन्दमात्मानं सम्यक् प्रस्रुतस्वेदपिच्छं सर्व्वस्रोतोविमुक्तं लघुभूतमपगतविबद्धस्तम्भसुप्तिवेदनागौरवमिति ततस्तां पिण्डिकामनुसरन् द्वारं प्रपद्येथाः । निष्क्रम्य च न सहसा चक्षुषोः परिपालनार्थं शीतोदकमुपस्पृशेथाः । अपगतसन्तापक्लमस्तु मुहूर्त्तात् सुखोष्णेन वारिणा यथान्यायं परिषिक्तोऽश्नीयाः । इति जेन्ताकः स्वेदः ॥ ६ ॥

“शयानस्य प्रमाणेन घनामश्ममयीं शिलाम् ।
तापयित्वा मारुतघ्नैर्द्दारुभिः संप्रदीपितैः ॥
व्यपोह्य सर्व्वानङ्गारान् प्रोक्ष्य चैवोष्णवारिणा ।
तां शिलामथ कुर्व्वीत कौशेयाविकसंस्तराम् ॥
तस्यां स्वभ्यक्तसर्व्वाङ्गः शयानः स्विद्यते सुखम् ।
रौरवाजिनकौशेयप्रावाराद्यैः सुसंवृतः ॥
इत्युक्तोऽश्मघनस्वेदः कर्षूस्वेदः प्रवक्ष्यते ॥ ७ ॥
खानयेत् शयनस्याधः कर्षूं स्थानविभागवित् ।
दीप्तैरधूमैरङ्गारैस्तां कर्षूं पूरयेत्ततः ॥
तस्यामुपरि शय्यायां स्वपन् स्विद्यति ना सुखम् ॥८॥
अनत्युत्सेधविस्तारां वृत्ताकारामलोचनाम् ।
घनभित्तिं कुटीं कृत्वा कुष्ठाद्यैः संप्रलेपयेत् ॥
कुटीमध्ये भिषक् शय्यां स्वास्तीर्णां चोपकल्पयेत् ।
प्रावाराजिनकौषेयकुथकम्बलगोलकैः ॥
हसन्तिकाभिरङ्गारैः पूर्णाभिस्ताञ्च सर्व्वशः ।
परिवार्य्यान्तरारोहेदभ्यक्तः स्विद्यति ना
सुखम् ॥ ९ ॥
य एवाश्मघनस्वेदविधिर्भूमौ स एव तु ॥ १० ॥
प्रशस्तायां निवातायां समायामुपदिश्यते ।
कुम्भीं वातहरक्वाथपूर्णां भूमौ निखानयेत् ॥
अर्द्धभागं त्रिभागं वा शयनं तत्र चोपरि ।
स्थापयेदासनं वापि नातिसान्द्रपरिच्छदम् ॥
अथ कुम्भ्यां सुसन्तप्तान् प्रक्षिपेदयसो गुड़ान् ।
पाषाणान् वोष्मणा तेन तत्स्थः स्विद्यति ना
सुखम् ॥ ११ ॥
सुसंवृताङ्गः स्वभ्यक्तः स्नेहैरनिलनाशनैः ।
कूपं शयनविस्तारं द्विगुणञ्चापि वेधतः ॥
देशे निवाते शस्ते च कुर्य्यादन्तः सुमार्जितम् ।
हस्त्यश्वगोखरोष्ट्राणां करीषैर्दग्धपूरिते ॥
स्ववच्छन्नः सुसंस्तीर्णेऽभ्यक्तः स्विद्यति ना
सुखम् ॥ १२ ॥
धीतीकान्तु करीषाणां यथोक्तानां प्रदीपयेत् ॥
धीतीकां गुण्डिकाम् ।
शयनान्तःप्रमाणेन शय्यामुपरि तत्र च ।
सुदग्धायां विधूमायां यथोक्तामुपकल्पयेत् ॥
स्ववच्छन्नः सुखं तत्राभ्यक्तः स्विद्यति वा सुखम् ।